पञ्च पाकाः। [1]दश पाकाः। गणनग्रहणं [2]किमर्थम्, [3]यावता गणनात्मिकैव सङ्ख्या? अक्रियमाणे गणनग्रहणे क्रियाभ्यावृत्तौ वर्तमानेभ्यः सङ्ख्येयवचनेभ्य एव प्रत्ययः स्यात्, [4]शतवारान् भुङ्क्ते शतकृत्वः इति। इह न स्यात्, शतं वाराणां भुङ्क्ते इति। न ह्यत्राभ्यावृत्तौ शतशब्दः, सङ्ख्यानमात्रवृत्तित्वात्। गणनग्रहणात् तु सर्वत्र सिद्धं भवति॥

## द्वित्रिचतुर्भ्यः सुच्। (१८/२०८६)

द्वि त्रि चतुर् इत्येतेभ्यः सङ्ख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने [5]वर्तमानेभ्यः सुच् प्रत्ययो भवति। कृत्वसुचोऽपवादः। द्विर्भुङ्क्ते। त्रिर्भुङ्क्ते। चतुर्भुक्तम्। चकारः स्वरार्थः॥

## एकस्य सकृच्च। (१९/२०८७)

एकशब्दस्य सकृत् इत्ययमादेशो भवति [6]सुच् च प्रत्ययः [7]क्रियागणने। [8]कृत्वसुचोऽपवादः। अभ्यावृत्तिस्त्विह न सम्भवति। सकृद् भुङ्क्ते। सकृदधीते। एकः पाकः इत्यत्र न भवति, अनभिधानात्॥

## विभाषा बहोर्धाऽविप्रकृष्टकाले। (२०/२०८८)

बहुशब्दात् क्रियाभ्यावृत्तिगणने वर्तमानात् विभाषा धा प्रत्ययो भवति। कृत्वसुचोऽपवादः। पक्षे सोऽपि भवति। [9]अविप्रकृष्टग्रहणं क्रियाभ्यावृत्तिविशेषणम्। क्रियाणामुत्पत्तयश्चेद् आसन्नकालाः भवन्ति, न विप्रकृष्टकालाः। बहुधा दिवसस्य भुङ्क्ते, बहुकृत्वो दिवसस्य भुङ्क्ते। अविप्रकृष्टकाले इति किम्? बहुकृत्वो मासस्य भुङ्क्ते॥

## तत्प्रकृतवचने मयट्। (२१/२०८९)

तद् इति प्रथमासमर्थविभक्तिः। प्राचुर्येण प्रस्तुतं प्रकृतम्। प्रथमासमर्थात् प्रकृतोपाधिकेऽर्थे वर्तमानात्[10] स्वार्थे मयट् प्रत्ययो भवति। टकारो ङीबर्थः। अन्नं प्रकृतम् अन्नमयम्। [11]अपूपमयम्।

अपरे पुनरेवं सूत्रार्थमाहुः। प्रकृतम् [12]इति उच्यतेऽस्मिन् इति प्रकृतवचनम्। तदिति [13]प्रथमासमर्थात् प्रकृतवचनेऽभिधेये मयट् प्रत्ययो भवति। अन्नं प्रकृत[14]मस्मिन् अन्नमयो यज्ञः। [15]अपूपमयं पर्व। वटकमयी यात्रा। [16]द्वयमपि प्रमाणम्, उभयथा सूत्रप्रणयनात्॥

## समूहवच्च बहुषु। (२२/२०९०)

तत्प्रकृतवचने [17]इत्येव। बहुषु प्रकृतेषु उच्यमानेषु समूहवत् प्रत्यया भवन्ति। चकारात् मयट् च। मोदकाः प्रकृताः प्राचुर्येण प्रस्तुताः मौदकिकम् (४.२.४७/१२५६), मोदकमयम्। शाष्कुलिकम्, शष्कुलीमयम्। अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनानि।

---

1. दश पाकाः नास्ति क. 2. किम् फ. 3. यावता सङ्ख्या गणनात्मिकैव क. 4. शतं वारान् ह, शतं ड. 5. व्यावर्तमानेभ्यः क. 6. चकारात् इत्यधिकम् ह. 7. क्रियागणनमात्रे क. 8. वाक्यमिदं नास्ति ड. फ. 9. अविप्रकृष्टकालग्रहणं ड. 10. प्रातिपदिकात् इत्यधिकम् क. 11. यवागुमयम् क.ग.ह. 12. इदम् क, नास्ति ड. 13. प्रथमासमर्थविभक्तिप्रकृतवचने क, प्रकृतवचने नास्ति ह. 14. उच्यते ड. 15. शष्कुलीमयं ड. 16. उभयमपि ह, उभयथाऽपि सूत्रप्रणयनात् द्वयमपि प्रमाणम् क. 17. इत्यनुवर्तते फ.